**प्रेरणार्थे णिच्**

एतावता सार्वधातुकलकाराणां तिङन्तरूपाणि अवलोकितानि | तत्र वैशिष्ट्यं वर्तते यत् शबादयः विधीयन्ते इत्यतः तिङन्तपदस्य ज्ञानार्थं प्रथमप्रश्नः अस्माकं भवति—अयं धातुः कस्मिन् गणे अस्ति ? अधुना सार्वधातुकलकारेभ्यः किञ्चित् विरामं स्वीकृत्य ण्यन्तप्रकरणं परिशील्यते | अत्र णिचः वैशिष्ट्यं वर्तते यत् अयं प्रत्ययः आर्धधातुकः इति कारणेन गणीया चर्चा नितरां नापेक्षिता | धातुः कस्मिन् अपि गणे भवतु नाम, तस्य ण्यन्तरूपस्य गणेन सह न कोऽपि सम्बन्धः | पठति भ्वादिगणे, लिखति तुदादिगणे, क्षालयति चुरादिगणे, प्राप्नोति स्वादिगणे—परन्तु पाठयति, लेखयति, क्षालयति, प्रापयति इत्येषां कृते तिङन्तस्य रूपसाधनार्थं गणस्य आवश्यकता नास्ति एव | एषां गणः अपि नास्ति एव | "कस्मिन् गणे" इति प्रश्नस्तु नैव उदेति | उदेति चेत्, तस्य उत्तरं नास्ति हि | तर्हि अस्मिन् करपत्रे—सार्वधातुकलकारः यत्र नास्ति, तत्र गतिः कीदृशी इति अनेन ण्यन्तप्रकरणेन सम्यक्तया ज्ञास्यते |

प्रेरणार्थकणिचः व्यवस्था

**स्वतन्त्रः कर्ता** (१.४.५४) = क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् | कस्मिन्नपि वाक्ये यः वक्तुः इच्छया स्वतन्त्रतया क्रियां जनयति, तस्य कर्तृसंज्ञा भवति | कर्तृसंज्ञा-विधायकं सूत्रम् इदम् | स्वतन्त्रः प्रथमान्तं, कर्ता प्रथमान्तं, द्विपदमिदं सूत्रम् | **कारके** (१.४.२३) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **कारके स्वतन्त्रः कर्ता** |

क्रियाजनकत्वं कारकत्वम् | लेखकः इति यथा लेखं जनयति, जनकः इति शिशुं जनयति, तथा 'कारकः' इत्युक्ते यः क्रियां जनयति | क्रियायाः जनकः, क्रियानिष्पादकः *कारकः* | तत्र कारकं षड्विधम् इति प्रसिद्धिः | न केवलं कतृ-कारकं भवति; कर्म-कारकं, करण-कारकं, सम्प्रदान-कारकं, अपादान-कारकम्, अधिकरण-कारकम् अपि कारकाणि | प्रत्येकं कारकं क्रियायाः सिद्धौ साधकं, जनकं, निमित्तञ्च; तदर्थम् एव कारकम् इति नामकरणम् |

'**क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्**' | 'क्रियायां' इत्यनेन 'क्रियायाः जनकत्वे'; कारकत्वे इति फलितार्थः | 'स्वातन्त्र्येण' इत्यनेन मुख्यतः, प्रधानतः | कारकं वक्तुः इच्छायाः अधीने नित्यं भवति इति कृत्वा 'विवक्षितोऽर्थः' | वक्तुः इच्छा चेदेव कारकं भवति; तथा नास्ति चेत्, कारकं नास्ति | आहत्य क्रियायाः सिद्धौ स्वतन्त्रः वक्त्रा यः उच्यते, सः कर्तृसंज्ञको भवति |

'देवदत्तः काष्ठैः अग्निना ओदनं स्थाल्यां पचति' इति वाक्ये पञ्च कारकाणि सन्ति; सर्वाणि अपि पचनक्रियां प्रति जनकानि | किन्तु देवदत्तः एव वक्त्रा मुख्यरूपेण प्रकटी कृतः, *विवक्षितः* | तदर्थं स्वान्त्र्येण इत्युक्तम् | स्वं तन्त्रं यस्य इति स्वतन्त्रः; नाम कुविन्दः | आशयः एवं—यः मुख्यः, प्रधानः | तर्हि यद्यपि उक्ते वाक्ये पञ्च कारकाणि, क्रियाजनकानि, सन्ति, किन्तु देवदत्तः एव मुख्यः | किमर्थमिति चेत्, पञ्चसु कारकेषु देवदत्तः एव अन्यानि कारकाणि अनवलम्ब्य, स्वतन्त्रतया तानि उपयुज्य, पचनक्रियां जनयति |

'स्वतन्त्रतया' इति कथनस्य आशयः— (१) कर्तृ-कारकः देवदत्तः पचनक्रियां जनयितुं सक्रियः भवति सर्वप्रथमं, यदा अन्यानि कारकाणि क्रियाशीलानि न; (२) अपरेषां चतुर्णां कारकाणां प्रवृत्तिः निवृत्तिः च कर्तुः अधीने, किन्तु तत्र कर्तृ-कारकः देवदत्तः स्वतन्त्रः; (३) कर्तृ-कारकः अन्येषां कारकाणां प्रतिनिधिः भवितुम् अर्हति, किन्तु अन्ये कारकाः तस्य प्रतिनिधिः न भवितुम् अर्हन्ति; (४) अन्यानि कारकाणि न सन्ति चेदपि कर्तृ-कारकः क्रियां जनयितुं पारयति— यथा 'देवदत्तः आस्ते', 'देवदत्तः शेते', 'देवदत्तः पचति' इति |

अस्य सर्वस्य दर्शनेन एवं भाति यत् कर्ता सचेतनः भवेत् | किन्तु यथोक्तं, कारकं वक्तुः इच्छायाः अधीने भवति | तदर्थं प्रसिद्धवाक्यम् अस्ति '**विवक्षातः कारकाणि भवन्ति**' | अतः पचनक्रियायं यदा देवदत्तस्य स्वतन्त्रता–प्रधानता विवक्षिता तदा 'देवदत्तः पचति' इत्यस्मिन् देवदत्तस्य, यदा स्थाल्याः स्वतन्त्रता–प्रधानता विवक्षिता तदा 'स्थाली पचति' इत्यस्मिन् स्थाल्याः, कर्तृसंज्ञा भवति | अनेन स्पष्टं भवति यत् कर्तुः स्वतन्त्रता वक्तुः इच्छाम् अवलम्ब्य भवति | तत्र कर्तुः चेतना अस्ति एव इति नास्ति; कर्ता प्रमुखो भवति क्रियायाः साधने इति पर्यवसितम् |

कर्तुः अर्थः अग्रिमसूत्रस्य आधारः—

**तत्प्रयोजको हेतुश्च** (१.४.५५) = कर्तुः प्रयोजको हेतुसञ्ज्ञः कर्तृसञ्ज्ञश्च स्यात् | सामान्यकर्तुः प्रेरकस्य कर्तृ–संज्ञा अपि भवति, हेतु–संज्ञा अपि भवति | 'तस्य' (कर्तुः) 'प्रयोजकः' (प्रवर्तयिता), तत्प्रयोजकः षष्ठीतत्पुरुषः | तत्प्रयोजकः प्रथमान्तं, हेतुः प्रथमान्तं, च अव्ययपदं, त्रिपदमिदं सूत्रम् | **स्वतन्त्रः कर्ता** (१.४.५४) इत्यस्मात् **कर्ता** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **तत् प्रयोजकः हेतुः च कर्ता** |

प्रयोज्यकर्ता कार्यं करोति, प्रयोजककर्ता तं (प्रयोज्यकर्तारं) कार्यार्थं प्रेरयति | अस्यां दशायां प्रयोज्यकर्तुः स्वतन्त्रता तिष्ठति किम् इति जिज्ञासायां वैयाकरणाः वदन्ति यत् आं तिष्ठति | स च प्रेरितो भवति न वा इति स्वेच्छया अस्ति, कार्यं करोति न वा इति पुनः स्वेच्छया | यः कर्तारं प्रेरयति, तस्य कर्तृसंज्ञा हेतुसंज्ञा च स्याताम् | हेतु–संज्ञायाः महत्त्वं भवति अग्रिमे सूत्रे |

चुरादिगणे णिच्–प्रत्ययः विधीयते भिन्नसूत्रेण; ण्यन्तप्रकरणे णिच्–प्रत्ययः विधीयते पुनः पृथक्तया, भिन्नसूत्रेण—

**हेतुमति च** (३.१.२६) = प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात् | णिच् विधायकं सूत्रम् | क्रियार्थं यः प्रयोज्यं प्रेरयति, सः प्रयोजकः क्रियायाः हेतुः | आधारतया अस्यासीति हेतुमान्, मतुप्प्रत्ययः— प्रयोजकनिष्ठः प्रेषणादिव्यापारः हेतुमान्, तस्मिन् हेतुमति | व्यापारः इति प्रेषणादिक्रिया, स च व्यापारः हेतुमान् | 'स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन हेतुः यत्रास्ति स हेतुमान् व्यापारः, तस्मिन् वाच्ये णिज् इत्याहुः' इति तत्त्वबोधिनी | अस्यां स्थितौ—यत्र हेतुमाति व्यापारे प्रयोजकः हेतुः अस्ति—तत्र धातोः णिच्–प्रत्ययः विधीयते | हेतुमति सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **सत्याप–पाश–रूप–वीणा–तूल–श्लोक–सेना–लोम–त्वच–वर्म–वर्ण–चूर्ण–चुरादिभ्यो णिच्** (३.१.२५) इत्यस्मात् **णिच्** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१) **परश्च** (३.१.२) इत्यनयोः अधिकारः | **धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः, वचनपरिणामेन पञ्चमीविभक्तौ **धातुभ्यः** | अनुवृत्ति–सहितसूत्रं— **हेतुमति च धातोः णिच् प्रत्ययः परश्च** |

अत्र 'प्रेषणादौ' इत्युक्तम् | विभिन्नरीत्या कार्यार्थं प्रवर्तना, नाम प्रेरणा, भवति | अस्य प्रकटीकरणार्थं प्रेषणादौ इति व्यवहृतं सिद्धान्तकौमुद्याम् | बालमनोरमा इति सिद्धान्तकौमुदी–टीकाग्रन्थे दीयते— 'प्रेषणादावित्यादिशब्देन अध्येषणानुमत्युपदेशादीनां ग्रहणम् | तत्र भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणम् | आज्ञेत्यर्थः | समानस्याऽधिकस्य च सख्याचार्यादेः प्रवर्तना– अध्येषणा | अनुमति –– राजादेः समंतिः | ज्वरितस्य कषायपाने हितावबोधनेन प्रवर्तना–– उपदेशः | हननाद्भीत्या पलायमानस्य निरोधाचरणमपि प्रयोजकव्यापारः |'

क्रमेण—
प्रेषणादौ इत्यादिशब्देन अध्येषणा–अनुमति–उपदेशादीनां ग्रहणम् | अनेन विभिन्नरीत्या कार्यार्थं प्रवर्तना, प्रेरणा, भवति इत्युक्तम् |

तत्र भृत्यादेः निकृष्टस्य प्रवर्तना **प्रेषणम्** | आज्ञा इत्यर्थः | स्वामी कर्मचारिणा कार्यं कारयति |
समानस्य अधिकस्य च सख्याचार्यादेः प्रवर्तना— **अध्येषणा** | सज्जनः प्रार्थनां कृत्वा मित्रेण कार्यं कारयति |
अनुमतिः— राजादेः **सम्मतिः** | राजा अनुमतिं दत्त्वा कृषकैः तद्वर्षस्य कृषिकार्यं प्रारम्भयति |
ज्वरितस्य कषायपाने हितौ अबोधनेन प्रवर्तना— **उपदेशः** | वैद्यः रोगिणं तिक्तम् औषधं पाययति |
हननात् भीत्या पलायमानस्य निरोधाचरणमपि प्रयोजकव्यापारः— **अनुग्रहः** | दुर्जनः हन्त्रा भीतग्रस्तं पलायमानं गृहीत्वा मारयति | दुर्जनस्य हन्तारं प्रति अनुग्रहः |

णिजन्तधातोः च धातुसंज्ञा भवति अनेन सूत्रेण—

**सनाद्यन्ता धातवः** (३.१.३२) = **गुप्तिज्किद्भ्यः सन्** (३.१.५) इत्यस्य **सन्** इत्यारभ्य **कमेर्णिङ्** (३.१.३०) इत्यस्य **णिङ्** इत्यन्तं द्वादश प्रत्ययाः येषाम् अन्ते भवन्ति, तेषां धातु-संज्ञा स्यात् | सन् आदौ येषां ते सनादयः; सनादयः अन्ते येषां ते सनाद्यन्ताः | सनाद्यन्ताः प्रथमान्तं, धातवः प्रथमान्तं, द्विपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **सनाद्यन्ताः धातवः** |

द्वादश प्रत्ययाः सन्ति येषां योजनेन नूतनाः धातवः सृष्टाः भवन्ति— सन्, क्यच्, काम्यच्, क्यष्, क्यङ्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ् इति | एषां प्रकृतिः क्वचित् धातुः, क्वचित् प्रातिपदिकम् | एषु द्वादशसु प्रत्ययेषु अन्यतमः णिच् एव | अतः णिच्-प्रत्ययस्य योजनेन चोरि, पाठि, लेखि इत्यादयः यावन्तः धातवः सृष्टाः, ते सर्वे **सनाद्यन्ता धातवः** (३.१.३२) इति सूत्रेण धातुसंज्ञकाः | एते आतिदेशिकधातवः | औपदेशिकधातवः उपद्विसहस्रं, ते **भूवादयो धातवः** (१.३.१) इति सूत्रेण धातुसंज्ञकाः भवन्ति |

<u>णिच्-प्रत्ययः त्रिप्रकारकः</u>

१. यः णिच् प्रातिपदिकेभ्यः विधीयते = **मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्** (३.१.२१) इत्यनेन, **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्** (३.१.२५) इत्यनेन च | प्रातिपदिकेभ्यः णिच् भिन्नार्थेषु भवति अतः अस्मिन् पाठे न प्रतिपाद्यते | नामधातुप्रकरणे अयं विषयः आयाति |
२. यः णिच् चुरादिभ्यः स्वार्थे विधीयते = **सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण<u>चुरादिभ्यो</u> णिच्** (३.१.२५) इत्यनेन |
३. यः णिच् प्रेरणार्थे विधीयते = **हेतुमति च** (३.१.२६) इत्यनेन |

<u>प्रेरणार्थे णिचि तिङन्तनिष्पादनप्रक्रिया</u>

ये सामान्यनियमाः प्रयुक्ताः चुरादिगणे स्वार्थे, ते सर्वे प्रेरणार्थे ण्यन्तप्रक्रियायाम् अपि प्रयुक्ताः | अत्रापि तिङन्तरूपस्य साधनार्थं सोपानत्रयम् —

१. धातुः + णिच्-प्रत्ययः → णिजन्तधातुः
२. णिजन्तधातुः + शप्-विकरणप्रत्यः → अङ्गम् (तिङ्-प्रत्ययं निमित्तं मत्वा)
३. अङ्गम् + तिङ्-प्रत्ययः → तिङन्तरूपम्

अत्रापि णिच्–प्रत्ययस्य संयोजनेन तस्य निमित्तत्वात् प्रमुखकार्यत्रयं सम्भवति औपदेशिकधातोः स्वरूपम् अनुसृत्य—

१. **अचो ञ्णिति** (७.२.११५) = अजन्ताङ्गस्य अन्त्यवर्णस्य वृद्धिः भवति ञिति णिति प्रत्यये परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन **अचः अङ्गस्य** नाम न केवलम् अच् इत्यङ्गस्य, अपि तु अजन्तस्य अङ्गस्य | **अलोऽन्तस्य** इत्यनेन अन्तिमवर्णस्य एव स्थाने वृद्धिः | ञ् च ण् च ञ्णौ, ञ्णौ इतौ यस्य तत् ञ्णित्, तस्मिन् ञ्णिति, द्वन्द्वगर्भबहुव्रीहिसमासः | अचः षष्ठ्यन्तं, ञ्णिति सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **मृजेर्वृद्धिः** (७.२.११४) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अचः अङ्गस्य वृद्धिः ञ्णिति** |

प्रेरणार्थकणिचि यथा नी + णिच् → नै + इ → नायि → नाययति |

२. **अत उपधायाः** (७.२.११६) = उपधायाम् अतः वृद्धिः ञिति णिति प्रत्यये परे | अतः षष्ठ्यन्तम्, उपधायाः षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **मृजेर्वृद्धिः** (७.२.११४) इत्यस्मात् **वृद्धिः** इत्यस्य अनुवृत्तिः; **अचो ञ्णिति** (७.२.११५) इत्यस्मात् **ञ्णिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य उपधायाः अतः वृद्धिः ञ्णिति** |

प्रेरणार्थकणिचि यथा पठ् + णिच् → पाठि → पाठयति

३. **पुगन्तलघूपधस्य च** (७.३.८६) = सार्वधातुके आर्धधातुके च प्रत्यये परे पुगन्तस्य अङ्गस्य लघूपधस्य च इकः गुणः भवति | पुक् अन्ते यस्य तत् पुगन्तम्, लघ्वी उपधा यस्य तत् लघूपधम् | पुगन्तञ्च लघूपधञ्च तयोः पुगन्तलघूपधं समाहारद्वन्द्वः, तस्य पुगन्तलघूपधस्य | पुगन्तलघूपधस्य षष्ठ्यन्तं पदम्, च अव्ययपदं, द्विपदमिदं सूत्रम् | **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः; **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यस्य पूर्णानुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **इको गुणवृद्धी** (१.१.३) इत्यस्मात् परिभाषा–सूत्रात् **इकः** आयाति यत्र स्थानी नोक्तम् | अनुवृत्ति–सहितसूत्रम्— **पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः** |

प्रेरणार्थकणिचि यथा लिख् + णिच् → लेखि → लेखयति

<u>चुरादिगणे प्रेरणार्थे वैशिष्ट्यम्</u>

चुरादिगणे णिच्–प्रत्ययः स्वार्थे विधीयते एव चुर् + णिच् → चोरि; तदा प्रेरणार्थे विवक्षा भवति चेत्, द्वितीयः णिच्–प्रत्ययः विधीयते चोरि + णिच् | अस्यां दशायां किं भवति इत्यस्य निर्णयार्थं सूत्रम् इदम्—

**णेरनिटि** (६.४.५१) = यस्य आर्धधातुकप्रत्ययस्य इडागमो नास्ति, तस्मात् पूर्वं णि–प्रत्ययस्य लोपो भवति | अत्र 'णि' इत्यस्य अनुबन्धरहितत्वात् णिङ्, णिच् द्वयोः ग्रहणम्; उभयत्र 'इ' इत्येव अवशिष्यते | णेः षष्ठ्यन्तं, अनिटि सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **अतो लोपः** (६.४.४८) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **आर्धधातुके** (६.४.४६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **णेः लोपः अनिटि आर्धधातुके** |

णिच्–प्रत्ययः वलादिः नास्ति इति कारणतः तस्य इडागमो न कदापि भवति | अनेन चुरादिगणे कश्चन णिजन्तधातुः अस्ति चेत्, प्रेरणार्थे यदा द्वितीयः णिच्–प्रत्ययः विधीयते, तदा प्रथमणिचः (स्वार्थिकणिचः) लोपो भवति | अतः एकस्मिन् धातौ णिच् केवलं एकैव वारं सम्भवति | द्वितीयवारं णिचः विधानं भवति किन्तु **णेरनिटि** (६.४.५१) इत्यनेन प्रथमस्य लोपो भवति | अतः चुरादिगणे स्वार्थिकणिचः प्रेरणार्थकणिचः तिङन्तरूपं समानम् |

चुर् → **पाश–रूप–वीणा–तूल–श्लोक–सेना–लोम–त्वच–वर्म–वर्ण–चूर्ण –चुरादिभ्यो णिच्** (३.१.२५) इयनेन चुरादिगणे णिच्–प्रत्ययः विधीयते स्वार्थे → चुर् + णिच् → चोरि स्वार्थे → **हेतुमति च** (३.१.२६) इत्यनेन प्रेरणार्थे णिच् → चोरि + णिच् → चोरि + इ → **णेरनिटि** (६.४.५१) इत्यनेन प्रथम–णिचः लोपः → चोर् + इ → चोरि प्रेरणार्थे

<u>सामान्यधातूनां समग्रप्रक्रियाचिन्तनम्</u>

क्रमेण अजन्तधातवः (अकारान्ताः, आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकारान्ताः, ॠकारान्ताः, एजन्ताः), तदा हलन्तधातवः (अदुपधाः, इदुपधाः, उदुपधाः, ऋदुपधाः, अवशिष्टाः) अस्माभिः परिशील्यते | अकारान्तधातवः (इत्युक्ते अदन्ताः) हलन्तधातुषु पश्येम यतोहि तेषां अकारलोपः भवति अतः ते हलन्तधातुभिः तुल्याः |

अस्मिन् करपत्रे सामान्यधातूनाम् आलोचना क्रियते; अग्रिमे करपत्रे विशेषधातवः परिशील्यन्ते |

A. <u>अजन्तधातवः</u>

१. <u>आकारान्तधातवः</u>

अ) पुगागम–सहिताः ण्यन्तधातवः

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) = ऋ, ह्री, व्ली, री, क्नूयी, क्ष्मायी, एभ्यः धातुभ्यः अपि च आकारान्तधातुभ्यः पुक्–आगमः भवति, णिच्–प्रत्यये परे | एषां धातूनां पुक्–आगमः णौ (णि इत्यस्य सप्तम्यन्तम्), णि इत्युक्ते णिच् इत्यतः णिच्–प्रत्यये परे इत्यर्थः | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन धातोः परम् आयाति अयं पुगागमः | पुक् इत्यस्मिन क्, उ इत्यनयोः इत्–संज्ञा लोपश्च; प् अवशिष्यते | अर्तिश्च ह्रीश्च व्लीश्च रीश्च क्नूयीश्च क्ष्मायीश्च आच्च तेषामितरेतरद्वन्द्वः, अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातः तेषाम् | अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां षष्ठ्यन्तं, पुक् प्रथमान्तं, णौ सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्याताम् अङ्गानां पुक् णौ** |

सामान्येषु चुरादिगणीयधातुषु ज्ञा–धातुः एकैव आकारान्तधातुः, स च अस्माभिः दृष्टः | इदानीं प्रेरणार्थकणिचि आकारान्ताः यथा दा, धा इति | णिच् इत्यस्मिन् ण्, च् इत्यनयोः इत्–संज्ञा, पुक् इत्यस्मिन् उ, क् इत्यनयोः इत्–संज्ञा, लोपश्च |

दा + णिच् → दा + पुक् + इ → दा + प् + इ → दापि → **सनाद्यन्ता धातवः** (३.१.३२) इत्यनेन धातु–संज्ञा → दापि + शप् + ति → दापयति

धा + णिच् → धा + पुक् + इ → धा + प् + इ → धापि → **सनाद्यन्ता धातवः** (३.१.३२) इत्यनेन धातु-संज्ञा → धापि + शप् + ति → धापयति

धातुपाठे यावन्तः आकारान्तधातवः, तेषां सर्वेषां पुगागमो भवति |

धेयं यत् दापि, धापि इव पाठि, लेखि अपि यः कोऽपि णिजन्तः, **सनाद्यन्ता धातवः** (३.१.३२) इति सूत्रेण धातुसंज्ञां प्राप्नोति | यत्र धातुः जातः, तत्र विवक्षायां लट्, लोट्, लङ्, विधिलिङ् लकाराः विधीयन्ते, तेषां स्थाने तिङ्-प्रत्ययाः, तदा **कर्तरि शप्** इत्यनेन शप् विहितः, अन्ते वरणमेलनेन तिङन्तरूपं निष्पन्नम् | दापि, धापि इत्यादयः णिजन्तधातवः नूतनतया धातुसंज्ञां यदि न प्राप्स्यन्, तर्हि तिबादयः तिङ्-प्रत्ययाः विहिताः नाभविष्यन् |

दापि इकारान्तधातुः अस्ति | शपः परत्वात् दापि + अ | **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः दापे**, एचोऽयवायावः** इत्यनेन अय् आदेशः दापय् + अ → दापय इति अङ्गम् |

एवमेव णिजन्तधातवः सर्वे इकारान्ताः— पाठि, लेखि, गमि, निन्दि, क्षालि— अतः सर्वत्र अयमेव चिन्तनक्रमः | अग्रे गत्वा अस्मिन् करपत्रे, बोध्यं यत् सर्वत्र धातोः व्युत्पत्त्यनन्तरं **सार्वधातुकार्धधातुकयोः**, **एचोऽयवायावः** इत्याभ्याम् अङ्गं, तदा तिङः योजनेन तिङन्तपदं निष्पन्नम् |

आ) <u>एजन्तधातवः</u>—सर्वे आकारान्तधातवः भवन्ति

**आदेच उपदेशेऽशिति** (६.१.४५) = उपदेशे एजन्तस्य धातोरात्त्वं न तु शिति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तदन्तविधिः; **अलोन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य अलः स्थाने | एच् इत्यनेन 'ए, ऐ, ओ, औ' | श् इत् यस्य स शित्, न शित् अशित्, तस्मिन् (विषये) अशिति, नञ्तत्पुरुषः | आत् प्रथमान्तम्, एचः षष्ठ्यन्तम्, उपदेशे सप्तम्यन्तम्, अशिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **लिटि धातोरनभ्यासस्य** (६.१.८) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **एचः धातोः आत् उपदेशे अशिति** |

यथा—
ग्लै → ग्ला
म्लै → म्ला
ध्यै → ध्या
शो → शा
सो → सा
वे → वा
छो → छा

अतः णिच्-प्रकरणे एजन्तधातवः आकारान्ताः एव इति अवगम्यताम् | आकारान्ताः इति कारणतः **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** इत्यनेन पुगागमः भवति इति सामान्यनियमः |

यथा—

ग्लै + णिच् → ग्ला + इ → ग्ला + पुक् + इ → ग्ला + प् + इ → ग्लापि → **सनाद्यन्ता धातवः** (३.१.३२) इत्यनेन धातु-संज्ञा → ग्लापि + शप् + ति → ग्लापयति

तथैव म्लै → म्लापयति, ध्यै → ध्यापयति, गै → गापयति, रै → रापयति, खै → खापयति

परन्तु केषाञ्चित् एजन्तानां च आकारान्तानां च युक् भवति न तु पुक्—

इ) युक्-आगमः (पुक्-आगम-अपवादः)

**शाच्छासाह्वाव्यावेपां युक्** (७.३.३७) = शो, छो, सो, ह्वे, व्ये, वे, पै इत्येषां धातूनां युक् आगमो भवति णिचि परे | पुगागमस्य अपवादः | शाश्च, छाश्च, साश्च, ह्वाश्च, व्याश्च, वेश्च, पाश्च, तेषामितरेतरयोगद्वन्द्वः, शाच्छासाह्वाव्यावेपाः तेषां, शाच्छासाह्वाव्यावेपाम् | शाच्छासाह्वाव्यावेपां षष्ठ्यन्तं, युक् प्रथमान्तं, द्विपदमिदं सूत्रम् | **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ** (७.३.३६) इत्यस्मात् **णौ** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **शाच्छासाह्वाव्यावेपां अङ्गानां युक् णौ** |

**आदेच उपदेशेऽशिति** (६.१.४५) इत्यनेन एषाम् एजन्तधातूनाम् आत्त्वम् | शो, छो, सो, ह्वे, व्ये, वे, पै |

शो तनूकरणे (कृशं करोति, श्यति) → शा + युक् + णिच् → शायि → शाययति
छो छेदने (छ्यति) → छा + युक् + णिच् → छायि → छाययति
षो अन्तकर्मणि (समापनं करोति, स्यति) → सा + युक् + णिच् → सायि → साययति
ह्वेञ् स्पर्धायां शब्दे च (आह्वयति) → ह्वा + युक् + णिच् → ह्वायि → ह्वाययति
व्येञ् संवरणे (आच्छादयति, व्ययति) → व्या + युक् + णिच् → व्यायि → व्याययति
वेञ् तन्तुसन्ताने (कुविन्दस्य कार्यम्, वयति) → वा + युक् + णिच् → वायि → वाययति
पै शोषणे (शुष्कं करोति, पायति) → पा + युक् + णिच् → पायि → पाययति
पा पाने → पा + युक् + णिच् → पायि → पाययति

२. इकारान्तधातवः, ईकारान्तधातवः च

**अचो ञ्णिति** (७.२.११५) इत्यनेन एषां धातूनाम् अन्त्यस्य इकारस्य ईकारस्य च वृद्धिः | तदा **एचोऽयवायावः** इत्यनेन अय्, आय् च आदेशः |

यथा—

नी + णिच् → नै + इ → नाय् + इ → नायि → **सनाद्यन्ता धातवः** → नायि + शप् + ति → नाययति

धातुपाठे यावन्तः इकारान्ताः ईकारान्ताः च धातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

३. उकारान्तधातवः, ऊकारान्तधातवः च

**अचो ञ्णिति** (७.२.११५) इत्यनेन एषां धातूनाम् अन्त्यस्य उकारस्य ऊकारस्य च वृद्धिः | तदा **एचोऽयवायावः** इत्यनेन अव्, आव् च आदेशः |

यथा—

भू + णिच् → भौ + इ → भाव् + इ → भावि → **सनाद्यन्ता धातवः** → भावि + शप् + ति → भावयति
लू + णिच् → लौ + इ → लाव् + इ → लावि → **सनाद्यन्ता धातवः** → लावि + शप् + ति → लावयति
पू + णिच् → पौ + इ → पाव् + इ → पावि → **सनाद्यन्ता धातवः** → पावि + शप् + ति → पावयति
द्रु + णिच् → द्रौ + इ → द्राव् + इ → द्रावि → **सनाद्यन्ता धातवः** → द्रावि + शप् + ति → द्रावयति

धातुपाठे यावन्तः उकारान्ताः ऊकारान्ताः च धातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

४. ऋकारान्तधातवः, ॠकारान्तधातवः च

**अचो ञ्णिति** (७.२.११५) इत्यनेन एषां धातूनाम् अन्त्यस्य ऋकारस्य ॠकारस्य वा वृद्धिः |

यथा—

कृ + णिच् → कार् + इ → कारि → **सनाद्यन्ता धातवः** → कारि + शप् + ति → कारयति
हृ + णिच् → हार् + इ → हारि → **सनाद्यन्ता धातवः** → हारि + शप् + ति → हारयति
तृ + णिच् → तार् + इ → तारि → **सनाद्यन्ता धातवः** → तारि + शप् + ति → तारयति

धातुपाठे यावन्तः ऋकारान्ताः ॠकारान्ताः च धातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

B. हलन्तधातवः

१. अदुपधधातवः

**अत उपधायाः** (७.२.११६) इत्यनेन उपधायाम् अतः वृद्धिः |

पठ् + णिच् → पाठि → पाठयति
वद् + णिच् → वादि → वादयति
पत् +णिच् → पाति → पातयति
नट् + णिच् → नाटि → नाटयति

धातुपाठे यावन्तः अदुपधधातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

२. इदुपधधातवः

**पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधायां लघु–इकः गुणः |

लिख् + णिच् → लेख् + इ → लेखि → लेखयति
छिद् + णिच् → छेद् + इ → छेदि → छेदयति

धातुपाठे यावन्तः इदुपधधातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

३. उदुपधधातवः

**पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधायां लघु–इकः गुणः |

बुध् + णिच् → बोध् + इ → बोधि → बोधयति
मुद् + णिच् → मोद् + इ → मोदि → मोदयति

धातुपाठे यावन्तः उदुपधधातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

४. ऋदुपधधातवः

**पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन उपधायां लघु–इकः गुणः |

कृष् + णिच् → कर्ष् + इ → कर्षि → कर्षयति
वृष् + णिच् → वर्ष् + इ → वर्षि → वर्षयति

धातुपाठे यावन्तः ऋदुपधधातवः सन्ति, तेषां सर्वेषाम् एवमेव क्रमो भवति |

५. <u>शेषधातवः</u>

कार्यं नास्ति यतोहि उपधायाम् अत् अपि नास्ति, लघु इक् अपि नास्ति |

बुक्क् + णिच् → बुक्क् + इ → बुक्कि → बुक्कयति
एध् + णिच् → एध् + इ → एधि → एधयति

इति सामान्यधातूनां ण्यन्तव्यवस्था | अग्रिमे करपत्रे विशेषाः अजन्तधातवः वीक्ष्यन्ते |

Swarup – May 2013 (Updated April 2017)